श्री रवि स्तोत्रं (सांबपुराणे)

श्री रवि स्तोत्रं (सांबपुराणे)

त्वं देव ऋषिकर्ता च प्रकृतिः पुरुषः प्रभुः |
छाया संज्ञा प्रतिष्ठापि निरालंबो निराश्रयः || 1 ||

आश्रयः सर्वभूतानां नमस्तेऽस्तु सदा मम |
त्वं देव सर्वतश्चक्षुः सर्वतः सर्वदा गतिः || 2 ||

सर्वदः सर्वदा सर्वः सर्वसेव्यस्त्वमार्तिहा |
त्वं देव ध्यानिनां ध्यानं योगिनां योग उत्तमः || 3 ||

त्वं भाषाफलदः सर्वः सद्यः पापहरो विभुः |
सर्वार्तिनाशं नो नाशीकरणं करुणा विभुः || 4 ||

दयाशक्तिः क्षमावासः सघृणिर्घृणिमूर्तिमान् |
त्वं देव सृष्टिसंहारस्थितिरूपः सुराधिपः || 5 ||

बकः शोषो वृकोदाहस्तुषारो दहनात्मकः |
प्रणतार्तिहरो योगी योगमूर्ते नमोऽस्तु ते || 6 ||

त्वं देव हृदयानंद शिरोरत्नप्रभामणिः |
बोधकः पाठको ध्यायी ग्राहको ग्रहणात्मकः || 7 ||

त्वं देव नियमो न्यायी न्यायको न्यायवर्धनः |
अनित्यो नियतो नित्यो न्यायमूर्ते नमोऽस्तु ते || 8 ||

त्वं देव त्रायसे प्राप्तान् पालयस्यर्पवस्थितान् |
ऊर्द्धत्राणार्दितान् लोकान् लोकचक्षुर्नमोऽस्तु ते || 9 ||

दमनोऽसि त्वं दुर्दांतः साध्यानां चैव साधकः |
बंधुः स्वबंधुहीनानां नमस्ते बंधुरूपिणे || 10 ||

इति श्रीसांबपुराणे त्रिचत्वारिंशोऽध्याये रवि स्तोत्रं ||